४

# सा देवी सर्वभूतेषु शक्तिरूपेण संस्थिता

(महिलादिवसकार्यक्रमप्रसङ्गः, अधिमञ्चं विशिष्टाः अतिथयः पुरतः श्रोतारः च दृश्यन्ते)




**मेधा** – नमस्ते। स्वयंप्रभा-महिला-स्वयंसेविका-संस्थापक्षतः अहम् उपस्थितानां सर्वेषां हार्दं स्वागतं करोमि। अद्य वयम् अत्र अन्ताराष्ट्रियमहिलादिवस-कार्यक्रमस्य निमित्तेन समुपस्थिताः स्मः। अस्माकं मध्ये अस्य कार्यक्रमस्य प्रमुखातिथिरूपेण विराजमाना अस्ति अस्य जनपदस्य मान्या जनपदप्रशासनाधिकारिणी युगन्धरामहोदया। कार्यक्रमस्य अध्यक्षरूपेण मञ्चम् अलङ्कुर्वाणा वर्तते उच्चन्यायालयस्य भूतपूर्वन्यायाधीशा अन्वीक्षा महोदया। स्वीयकर्तृत्वेन स्वनाम अन्वर्थं कुर्वत्याः युगन्धरामहोदयायाः अन्वीक्षायाः महोदयायाः च वयं तुलसीतरुप्रदानेन पुस्तकप्रदानेन च स्वागतं कुर्मः।

*(श्रोतारः करतलध्वनिना स्वागतं कुर्वन्ति)*

**मेधा** – अहं मान्यां जनपदप्रशासनाधिकारिणीं सविनयं प्रार्थये सा महोदया महिलादिवसविषये स्वविचारान् उपस्थापयतु इति।

**युगन्धरा** – मम पुरतः शक्तिरूपेण उपस्थितां नारीशक्तिम् अहं प्रणमामि। मार्चमासस्य एषः अष्टमः दिनाङ्कः विश्वस्मिन् सर्वत्र महिलादिवसरूपेण आचर्यते। अस्मिन् प्रसङ्गे नारीणां भूषणाणि कानि इति मम मनसि कश्चन प्रश्नः उदेति। किं महार्घाणि स्वर्णमयानि रजतमयानि वा हारकुण्डलादीनि नारीणां वास्तविकानि आभूषणानि? न। किञ्चित् सुभाषितम् अस्मिन् प्रसङ्गे स्मरामि

**बुद्ध्युत्साह-स्मृति-प्रज्ञा-कला-धृति-सहिष्णुताः।**
**नारीणां भूषणान्येवं न मात्रं रूपचारुता।।**

बुद्धिः उत्साहः स्मृतिः प्रज्ञा विविधकलाः धैर्यं सहिष्णुता च इत्येतानि खलु नारीणां भूषणानि। एतैः आभूषणैः शोभमानाः महिलाः अद्य अवश्यं स्मर्यन्ते। यथा वेदेषु वर्णिता वीराङ्गना विश्पला अस्माभिः स्मर्यते। तथैव कारगिलयुद्धवीराङ्गना गुञ्जनसक्सेना अपि अस्माकं स्मृतिपटले अवतरति। अस्माकं मनसि जिज्ञासा भवति। का एषा विश्पला का वा एषा गुञ्जनसक्सेना इति। शृण्वन्तु तर्हि -

वैदिके युगे कश्चन राजा आसीत्। सः क्रीडासु अतीव पटुः आसीत्। अत एव खेलः इति तस्य नाम प्रसिद्धम् अभवत्। खेलराजस्य पत्नी विश्पला युद्धनिपुणा वीराङ्गना च आसीत्। कदाचिद् देशे युद्धमारब्धम्। राज्ञी विश्पला अपि युद्धरङ्गं प्रविश्य देशरक्षायै अयुध्यत। पराक्रमेण युद्धं कुर्वती सा शत्रुभिः परिवेष्टिता जाता। तस्याः पादः शत्रूणां शस्त्रैः छिन्नः अभवत्। महतीं वेदनां सहमानापि सा हतोत्साहा न जाता। यद्यपि तस्याः पादः भग्नः तथापि तस्याः निर्धारः अभङ्गः आसीत्। सा युद्धम् अनुवर्तयितुं शत्रून् जेतुं च ऐच्छत्। तस्याः एवंविधं मनोबलं धैर्यं वीरोचितभावं च दृष्ट्वा राज्ञः मार्गनिर्देशकः महर्षिः अगस्त्यः विस्मितः जातः। सः तस्यामेव रात्रौ देवचिकित्सकौ अश्विनीकुमारौ समाह्वयत्। अश्विनीकुमारौ च समागत्य विश्पलायाः पादोपचारं कृतवन्तौ। तस्याः अक्षय्यं निर्धारं विज्ञाय तौ तस्यै लोहनिर्मितपादञ्च अकल्पयताम्। ततः सर्वेषाम् अनुज्ञां प्राप्य अभिनवेन उत्साहेन झञ्झावातवत् रणाङ्गणं



© NCERT not to be republished

प्रविश्य सा विजयश्रियं प्राप्नोत्। कृत्रिमपादयुता अपि विश्पला रणे अपूर्वं पराक्रमं प्रदर्शितवती। भारतीयमहिलासु राज्ञी विश्पला इच्छाशक्तेः प्रतिरूपमिव सर्वान् प्रेरयति। वेदकालीनानां महिलानाम् उज्ज्वलश्रेण्यां यत्र गार्गी मैत्रेयी लोपामुद्रा अपाला इत्यादीनि महिलारत्नानि राजन्ते, तन्मध्ये माणिक्यमिव शोभमानं स्त्रीरत्नम् अस्ति विश्पला।

वीराङ्गनानाम् इयं परम्परा अस्मिन् देशे निरन्तरं प्राचलत्। आधुनिके कालेऽपि वीराङ्गनानां सा परम्परा अनुवर्तते। अत्र विश्पलासदृशी क्षात्रतेजोयुता गुञ्जन-सक्सेना अपि स्मर्यते। उत्तरप्रदेशस्य लक्ष्मणपुरनिवासिनी इयं महिला चिरकालीनं स्वप्नं साक्षात्कर्तुं भारतीयवायुसेनायाः वैमानिकप्रशिक्षणं यशस्वितया समाप्य प्रथमा महिलायुद्धवैमानिकी अभवत्। कारगिल-युद्धकाले युद्धविमानम् उड्डाययन्ती सा उपसहस्रं व्रणितान् आपद्ग्रस्तान् च सैनिकान् युद्धभूमितः सुरक्षितं स्थानं प्रति आनयत्। सा युद्धरतेभ्यः सैनिकेभ्यः विमानेन अपेक्षितवस्तूनाम् आपूर्तिमपि कृतवती। युद्धक्षेत्रे सङ्कटपरिस्थितौ तया प्रदर्शितं शौर्यं धैर्यं च उपलक्ष्य भारतसर्वकारेण शौर्यचक्रपुरस्कारं दत्त्वा तस्याः सम्माननं कृतम्। किन्तु




© NCERT not to be republished

भारतीयवायुसेनायां तस्याः प्रवेशः प्रशिक्षणं च तथा सुलभं सुगमं च नासीत्। सर्वान् विघ्नान् अविगणय्य निर्भयेन मनसा युद्धक्षेत्रं प्रविश्य सर्वेषु विस्मयं जनयन्ती सा देशसेवां निरवहत्।

अनयोः द्वयोः महिलयोः इच्छाशक्तिः महती आसीत्। तयोः वर्धने ये सहकारिणः तेऽपि खलु श्लाघनीयाः। तेषां प्रेरणया इमे महिले ध्येयशिखरं प्राप्तवत्यौ। यदि वयं अस्मान् परितः विद्यमानाः महिलाः प्रेरयामः तथा तासां यथाशक्ति सहयोगं कुर्मः च तर्हि ताः अपि अवश्यं यशस्विन्यः भवेयुः। यदि महिलादिवसाचरणवेलासु समाजस्य एवंविधं चिन्तनपरिवर्तनं भवेत् तर्हि अद्यतनं दिनं सफलमिति चिन्तयामि। तेन कुटुम्बेषु समरसता समाजे एकता च वर्धेत। अथ च तेन देशस्य विकासः त्वरितः भवेत्। एतेन वचनेन विरमामि—

**पुरुषाणामिव स्त्रीणां सर्वाङ्गीणा समुन्नतिः।**
**यत्र स्यात् तत्र राष्ट्रे हि स्वर्गः प्रावतरिष्यति ॥**

**मेधा** – धन्यवादाः महोदये! भवत्याः प्रेरकवचनैः सर्वे महतीम् ऊर्जां प्राप्तवन्तः। संप्रति कार्यक्रमस्य अध्यक्षवर्यां न्यायमूर्तिम् अन्वीक्षामहोदयां प्रार्थये सा आध्यक्षीयभाषणेन कार्यक्रमस्य समापनं करोतु इति।

**अन्वीक्षा** – स्वयंप्रभा इति भवतीनां संस्थायाः नाम। मया अद्य काश्चन वन्दनीयाः नार्यः स्मर्यन्ते यथा राज्ञी लक्ष्मीबाई, जिजाबाई, अहल्यादेवी, चेन्नमा, रुद्रमाम्बा, भगिनी निवेदिता, शारदादेवी, सावित्री च। मया स्मृताः एताः सर्वाः अपि नार्यः पुण्यश्लोकाः जगद्विख्याताः नार्यः आसन्। नूनं भवत्यः सर्वाः अपि स्वकर्तृत्वेन खलु स्वयंप्रकाशिन्यः सन्ति।

अद्य वयमपि संकल्पं कुर्मः अस्माकम् अस्याः गौरवशालिन्याः परम्परायाः वयं समर्थं निर्वहणं करिष्यामः इति।

**महिलागुणशक्तीनां प्राकृतानां विकासनम्।**
**सुशिक्षणैः सुसंस्कारैर्भूयो भवतु भारते ॥**

© NCERT not to be republished

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| जनपदप्रशासनाधिकारिणी (षष्ठीतत्पुरुषः) | जनपदस्य प्रशासनस्य अधिकारिणी | जिलाध्यक्षा | district collector | |
| भूतपूर्वन्यायाधीशा (कर्मधारयः) | पूर्वं भूता भूतपूर्वा, भूतपूर्वा चासौ न्यायाधीशा | पूर्व न्यायाधीश | ex magistrate | |
| अन्वर्थम् | अनुगतः अर्थम् | सार्थक | having a meaningful name | |
| उदेति (√उत्+इण + लट्) | स्फुरति | उदय होता है | rises | |
| महार्घाणि (बहुव्रीहिः) | महन्ति अर्घाणि येषां तानि | महंगे | expensive | |
| स्वर्णमयानि (स्वर्ण + मयट्) | सुवर्णस्य विकाराणि | सोने के | made of gold | |
| रजतमयानि (रजत + मयट्) | रजतस्य विकाराणि | चांदी के | made of silver | |
| सहिष्णुता (सहिष्णु + तल्) | सहिष्णोः भावः | क्षमाशीलता | tolerance | |
| रूपचारुता | रूपस्य चारुता | रूप की सुन्दरता | beauty | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| युद्धरङ्गम् | युद्धस्य + अङ्गम् | युद्धभूमि को | to the battle field | |
| परिवेष्टिता | परितः वेष्टिता | घिरी हुई | surrounded | |
| हतोत्साहा (बहुव्रीहिः) | हतः उत्साहः यस्याः सा | जिसका उत्साह नष्ट हो गया है | disappointed | |
| निर्धारः | निश्चयः | निर्णय | affirmation | |
| अक्षय्यम् (नञ् तत्पुरुषः) | न क्षय्यः, तम् | जो क्षय न हो सके | imperishable | |
| वीरोचितभावम् (तत्पुरुषः, कर्मधारयः) | वीराय उचितः, वीरोचितः च असौ भावः | वीरों के लिए योग्य आचरण या इच्छाशक्ति | valorous attitude | |
| अभिनवेन | नूतनेन | बिल्कुल नया या ताजा | quite new or fresh | |
| झञ्झावातवत् | महावातवत् | तूफान की तरह | like a hurricane | |
| प्रतिरूपमिव (अव्ययीभावः) | रूपं रूपं प्रति इति | प्रतिमा के समान | like a model | |
| क्षात्रतेजोयुता (कर्मधारयः तृतीयातत्पुरुषः) | क्षात्रं च तत् तेजः, क्षात्रतेजसा युता | क्षात्र तेज से परिपूर्ण | radiant with warrior spirit | |
| व्रणितान् (√व्रण + इतच्) | क्षतयुतान् | जख्मी | wounded | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| आपूर्तिम् | आपूरणम् | आपूर्ति | fulfilment | |
| अविगणय्य (वि+√गण+णिच् + ल्यप्) | न गणयित्वा, | परवाह न करते हुये | without reckoning or heeding | |
| सर्वाङ्गीणा | सर्वायवव्यापिका | सभी अंगो से परिपूर्ण | relating or belonging to all spheres | |
| समुन्नतिः | सर्वतो विकासः | सभी प्रकार से विकास | prosperity | |
| स्वयंप्रभा | स्वयंप्रकाशयुता | अपने ही तेज से चमकनेवाली | self-luminous | |
| पुण्यश्लोकाः (बहुव्रीहिः) | पुण्यः श्लोकः (चरित्रं) यासाम् | पावन चरित्र वाली | woman of holy reputation | |
| प्राकृतानाम् | स्वाभाविकानाम् | स्वाभाविकों का | natural | |

## अभ्यासाद् जायते सिद्धिः

१. **अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत—**

(क) अन्ताराष्ट्रियमहिलादिवसः कदा आचर्यते ?

(ख) खेलराजस्य मार्गदर्शकः कः आसीत् ?

(ग) अश्विनीकुमारौ केन निर्मितं पादं विश्पलायाः कृते अकल्पयताम् ?

(घ) भारतसर्वकारेण गुञ्जनसक्सेना कथं सम्मानिता ?

© NCERT not to be republished

(ङ) नारीणां भूषणानि कानि?

(च) भारतीयमहिलासु विश्पला कस्याः प्रतिरूपमिव सर्वान् प्रेरयति?

(छ) कारगिलयुद्धे गुञ्जनसक्सेना कं पराक्रमं कृतवती?

(ज) काः महिलाः पुण्यश्लोकाः स्वयंप्रभाः च सन्ति?

२. **रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत—**

(क) अद्य वयम् अत्र **अन्ताराष्ट्रियमहिलादिवसकार्यक्रमस्य** निमित्तेन समुपस्थिताः स्मः।

(ख) सः तस्यामेव रात्रौ **देवचिकित्सकौ अश्विनीकुमारौ** समाह्वयत्।

(ग) युद्धरतेभ्यः सैनिकेभ्यः अपेक्षितवस्तूनाम् आपूर्तिं **विमानेन** कृतवती।

(घ) स्वयंप्रभा इति **भवतीनां** संस्थायाः नाम।

(ङ) सा युद्धम् अनुवर्तयितुं **शत्रून्** जेतुं च ऐच्छत्।

३. **अधोलिखितेषु वाक्येषु विशेषणं विशेष्यं च चिनुत—**

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| (क) तस्याः अक्षय्यं निर्धारं विज्ञाय तौ तस्यै लोहनिर्मितपादञ्च अकल्पयताम्। | ........................ | ........................ |
| (ख) कृत्रिमपादयुता अपि विश्पला रणे अपूर्वं पराक्रमं प्रदर्शितवती। | ........................ | ........................ |
| (ग) विघ्नान् अविगणय्य निर्भयेन मनसा युद्धक्षेत्रं प्रविश्य सर्वेषु विस्मयं जनयन्ती सा देशसेवां निरवहत्। | ........................ | ........................ |
| (घ) भवत्याः प्रेरकवचनैः वयं सर्वे महतीम् ऊर्जां प्राप्तवन्तः। | ........................ | ........................ |

४. **उदाहरणं दृष्ट्वा अधोलिखितानां पदानां विग्रहं मेलनं वा कुरुत—**

| | |
|---|---|
| **देशरक्षायै** | **देशस्य रक्षा देशरक्षा, तस्यै** |
| (क) युद्धनिपुणा | .................................... |
| (ख) प्रेरकप्रसङ्गः | .................................... |
| (ग) वीरोचितभावः | .................................... |



© NCERT not to be republished

(घ) अपूर्वं पराक्रमम्   ………………………………

(ङ) महार्घाणि आभूषणानि   ………………………………

**५. अधोलिखितानि वाक्यानि पाठक्रमानुसारं पुनः लिखत—**

(क) तस्याः पादः शत्रूणां शस्त्रैः छिन्नः अभवत्।

(ख) अश्विनीकुमारौ विश्पलायाः पादोपचारं कृतवन्तौ।

(ग) पराक्रमेण युद्धं कुर्वती सा शत्रुभिः परिवेष्टिता जाता।

(घ) कृत्रिमपादयुता अपि विश्पला रणे अपूर्वं पराक्रमं प्रदर्शितवती।

(ङ) कदाचित् देशे युद्धम् आरब्धम्।



## स्वाध्यायान्मा प्रमदः

**बुद्ध्युत्साहस्मृतिप्रज्ञाकलाधृतिसहिष्णुताः।**
**नारीणां भूषणान्येवं न मात्रं रूपचारुता॥**

**पदच्छेदः** – बुद्धि–उत्साह–स्मृति–प्रज्ञा–कला–धृति–सहिष्णुताः नारीणाम् भूषणानि एवम् न मात्रं रूपचारुता

**अन्वयः** – बुद्धिः, उत्साहः,स्मृतिः,प्रज्ञा, कला, धृतिः, सहिष्णुता (इत्येतानि) नारीणां भूषणानि सन्ति रूपचारुता मात्रम् (आभूषणं) न (भवति)।

**भावार्थः** – नारीणां वास्तविकानाम् आभूषणानां विषये अस्मिन् श्लोके विचारः क्रियते। रूपसौन्दर्यम् इत्यपि नारीणां किञ्चित् आभूषणम् एव, किन्तु तस्य अपेक्षयापि कानिचन विशिष्टानि आभूषणानि तासां समीपे भवेयुः। यथा – बुद्धिः, कार्योत्साहः, स्मृतिः (समये ज्ञानस्य उपस्थितिः) प्रज्ञा (विवेकः) गीतवाद्यादिकलाः, धैर्यवृत्तिः, क्षमाभावः इति एतानि नारीणां खलु अमूल्यानि आभूषणाणि सन्ति।

**पुरुषाणामिव स्त्रीणां सर्वाङ्गीणा समुन्नतिः।**
**यत्र स्यात् तत्र राष्ट्रे हि स्वर्गः प्रावतरिष्यति॥**

(*ग्रामगीतामृतम्* २०.३६ )

**पदच्छेदः** – पुरुषाणाम् इव स्त्रीणाम् सर्वाङ्गीणा समुन्नतिः यत्र स्यात् तत्र राष्ट्रे हि स्वर्गः प्रावतरिष्यति

© NCERT not to be republished

**अन्वयः** – यत्र राष्ट्रे पुरुषाणाम् इव स्त्रीणां सर्वाङ्गीणा समुन्नतिः स्यात् तत्र राष्ट्रे हि स्वर्गः प्रावतरिष्यति।

**भावार्थः** – स्त्री पुरुषः च समाजस्य द्वे चक्रे स्तः। समाजस्य विकासाय द्वयोरपि चक्रयोः समाना गतिः अपेक्ष्यते। यस्मिन् राष्ट्रे यथा पुरुषाणां सर्वाङ्गीणा प्रगतिः भवति तथैव यदि महिलानाम् अपि सर्वाङ्गीणा प्रगतिः भवेत् तर्हि तस्य राष्ट्रस्य विकासः अतीव वेगेन भवेत्।

**महिलागुणशक्तीनां प्राकृतानां विकासनम्।**
**सुशिक्षणैः सुसंस्कारैः भूयो भवतु भारते ॥**

(*ग्रामगीतामृतम्* २०.१८)

**पदच्छेदः** – महिलागुणशक्तीनाम् प्राकृतानाम् विकासनम् सुशिक्षणैः सुसंस्कारैः भूयो भवतु भारते

**अन्वयः** – भारते सुशिक्षणैः सुसंस्कारैः प्राकृतानां महिलागुणशक्तीनां विकासनं भूयो भवतु।

**भावार्थः** – भारतदेशे याः महिलाः वर्तन्ते ताः गुणशालिन्यः सन्ति एव। तासु स्थितानां स्वाभाविकानां गुणानां केवलं विकासः करणीयः अस्ति। उत्तमैः शिक्षणविधानैः उत्तमैः संस्कारैः च महिलासु स्थितानां गुणशक्तीनां विकासो यदि भवेत् तर्हि ताः अपि अचिराद् विकसिताः भविष्यन्ति।

## यस्तु क्रियावान् मनुजः स विद्वान्

१. भवतां विद्यालये अन्ताराष्ट्रियमहिलादिवसम् अनुसृत्य कश्चन समारोहः आयोजितः अस्ति। अस्मिन् कार्यक्रमे विद्यालयप्रबन्धनसमितेः अध्यक्षः विद्यालयस्य प्रधानाचार्यः शिक्षकाः पालकाः छात्राश्च सम्मिलिताः भविष्यन्ति। भवती/भवान् अस्य कार्यक्रमस्य समायोजनसमितेः सदस्या / सदस्यः अस्ति। कार्यक्रमस्य कृते एकं निमन्त्रणपत्रं निर्मातव्यम् अस्ति।

**निमन्त्रणपत्रलेखने एते अंशाः अवधातव्याः —**

- पत्रे कार्यक्रमस्य नाम स्थानं दिनाङ्कः समयः इति एतेषाम् उल्लेखः भवेत्।
- कार्यक्रमस्य अध्यक्षः, अतिथिः, वक्ता इति एतेषामपि नाम्नाम् उल्लेखः अवश्यं भवेत्।
- कार्यक्रमस्य मुख्याकर्षणबिन्दूनाम् उल्लेखः भवेत् (यथा -भाषणम्, सांस्कृतिककार्यक्रमाः, सम्मानसमारोहः च )।
- पत्रिकायाः अन्त्यभागे आवाहकानां नामानि भवेयुः।

© NCERT not to be republished

२.	अस्मिन् चित्रे काचिद् वीराङ्गना प्रदर्शिता अस्ति। राष्ट्रस्य दासतानिवारणार्थं सा स्वराज्यस्थापनायाः कञ्चन स्वप्नं दृष्टवती। तदर्थं सा स्वपुत्रम् उत्तमसंस्कारैः शस्त्रशास्त्रप्रशिक्षणेन च समर्थं कृतवती। तस्याः मार्गदर्शनेन तस्याः पुत्रः पारतन्त्र्यस्य बन्धनानि भिन्नवान्। सः स्वीयराज्यस्य संस्थापनं कृतवान् मातुः स्वप्नं च कृतवान्। भवान् / भवती एतस्याः वीराङ्गनायाः तस्याः पुत्रस्य च विवरणं संकलय्य तयोः लघुप्रसङ्गं संवादमाध्यमेन प्रस्तौतु।

